नत्रिंशत्सावनावयवोनितानियदवशिष्यतेतावतेनांतरेणकस्मिन्नत्रिंशच्चांद्रसंख्यातःसावनसंख्यास्यायते।स
मजातेरनयोर्गतरयुक्तमित्येवमुक्तं। यद्यनेनावशेषणत्रिंशच्चांद्रास्तदारूपतुल्येनकिमितिशेषमनमुक्तं॥
अत्रसौरमासोनेसाधितत्वादधिमासाध्यांद्रोनेसाधितत्वादवमःसावनइतिशेषमनमुक्तं। क्रांतिमंडलस्थ
क्षत्रस्यानोदयद्वयांतरालकालोयथासर्वदातुल्यएवोपलभ्यतेनतथाक्रांतिवृत्तोदयद्वयांतरालकालइतिसौर
यस्फुटक्रियानारब्धाष्टभक्तलब्धसमासुभिश्चयुनानाक्षत्रषष्टिघटिकारवेःस्फुटंघुरात्रंभवतीत्युक्तं। ए
तंसौरवर्षमध्येनोदयसंख्यातःसूर्योदयसंख्यानिरूपितभवति। षष्टिनाक्षत्रघटीनांयावंतोऽसवस्तावंत
एववक्रकलाकाष्ठादिमध्यस्फुटिकलातुल्याएवासवोमध्यमेनैजाताःमध्यमस्फुटिकालतुल्यासुयुताना
क्षत्रघटिकाःसूर्यस्यमध्यमंसावनमितिप्रसिद्धं। अनेनमध्यमसावनेनाहर्गणोजातःस्फुटसावनस्यबलि
त्वात्। वर्षमध्येयावंतिस्युःसावनानितावत्येवमध्यमसावनानीतिकल्पादिगतवर्षगणजनिताहर्ग
णखंडेनकिंचिन्न्यूनमध्यमसावनांतरं। वर्तमानसौरवर्षाभ्यंतरेनक्षत्रांतरसाध्यं। शशिकलाभ्योरवेर
वमतुल्यत्वात्तन्निरक्षोदयवशेनमध्यमार्ककलातुल्यासुभ्योर्कस्यांतरमुदयांतरमित्यनयानारद
हर्गणेसंस्कार्यैरविःसाध्यइतिकेवलाहर्गणजनितरविस्फुटोदयांतरमानीयतद्वशेसंस्कृतेलंकायांमध्य

मार्कोदयकालिकोरविरेवल्लाघवार्थमुक्तस्तदुक्तं। अतएवाह। अहर्गणोमध्यमसावनेनेति। लंकोदयेऽकालिकानांस्वदेशार्कोदयकालीनकरणार्थंचरदेशांतरसंस्कारःक्रियतइत्याह। येनेनेति। रेवार्कोदयस्वदेशार्कोदययोरंतरंयाम्योत्तरंपूर्वापरदेशांतरवन्नसर्वदासमभितिचंचलत्वान्नस्फुटं। चरज्ञानार्थंमध्यरेवास्वरूपमाह। यल्लंकोज्जयिनीति। स्फुटक्षितिपरिधिस्वरूपंदेशांतरज्ञानार्थमाह। स्वदेशसंबंधितरयाजनैरिति॥ ॥श्रीमल्लोकणमणेरियमगाद्युक्तिस्तमध्याश्रिता॥ ॥अथस्पष्टगतिवासनोच्यते। स्वकक्षागोलपरिधौयत्रसमंतिर्यग्रेखाभिस्पष्टकक्षाकेंद्रंभगतेनकर्णाग्रेयत्रद्रष्टव्यः। भुजकोटिभ्यांकर्णःसिध्यतिभूगतस्पष्टभुजकोट्योर्जीवारूपाएवभवंतीतिगोलकथनार्थंज्योक्तिकथनंप्रतिजानीते॥ पटोमथेतिभुजकोटिकर्णानाह। इष्टेति। कोटिभुजोत्क्रमज्यास्तानमाह। दोरिति। त्रिज्याव्यासार्द्धतुल्यंकृत्वाचक्रकलाभिरंकितवृत्तेपूर्वापररेखेकार्ये। ययोर्भुजभागानांजीवास्तानंकर्तुमिष्टेतेभुजांशाःपूर्वापररेखातोजीवाग्रवृत्तपरिधिसंपातपर्यंतमनुज्यातेषामज्ञानार्थमिति सर्वत्रवेद्यं। अर्धज्याग्रेरेखरोमध्येसूत्रानिर्यक्संस्थोजायतेयेनतेन। अर्धज्याभिःकर्णसंबंधिग्रहणामर्धज्येत्यभिधानात्रवेधेतिस्पष्टाधिकारेउक्तं। इंदोर्ज्योभुजः जीवाग्रवृत्तसंपातायाम्योत्तररेखापर्यंतंयोऽर्धापररेखासाकोट्यंशानामर्धज्याकोटिः। वृत्तमध्याजीवा

यावृत्तपरिधिसंपातपर्यंतंतिर्यक्कर्णः। पूर्वापररेखायांज्यारूपमध्येबाणरूपाभुजोत्क्रमज्या। याम्योत्तररेखायांयाबाणरूपासाकोट्युत्क्रमज्येति। ज्यावर्गमध्यइति। त्रिभमौर्विकार्यइति। पूर्वापररेखावृत्तसंपातायाम्योत्तररेखावृत्तसंपातपर्यंतंसूत्रंवृत्तांतर्गतंचतुरश्रभुजःपंचचत्वारिंशद्दंशानांसंपूर्णजीवानामितुमर्हतिद्विगुणभुजोज्ञोपरिदीयमानस्त्रिदियंपंचचत्वारिंशद्दंशासंपूर्णजीवाकर्णः। अत्रत्रिज्यातुल्येभुजकोटीदृश्येतेतत्रस्थोयोगपदंकर्णइतित्रिज्यावर्गोद्विगुणोजातःकर्णवर्गः। अत्रार्धज्येवापेक्षितेतिद्विगुणत्रिज्यावर्गमूलदलंकार्यं। तत्रत्रिज्यावर्गार्धंमूलमेवगृहीतं। वर्गेणवर्गगुणयेदजेनेतिद्वयोस्तुल्यत्वात्। वृत्तांतःसमचतुरस्रभुजापंचचत्वारिंशद्दंशाजीवास्तात्। वृत्तांतःसमषडस्रभुजस्त्रिज्यातुल्यएवभवतिद्विगुणखगुणांशापरिदीयमानस्त्रादेकराशिसंपूर्णजीवातुल्योयमितित्रिज्यार्धंखगुणांशाजीवेति। एकराशिक्रमज्योत्क्रमज्येदेयेभुजकोटिवदत्रयःकर्णःसपंचदशानांसंपूर्णजीवाकर्णः। अतउक्तंक्रमोत्क्रमज्यास्तियोगामूलादिति। अत्रदोर्ज्यावर्गोनामत्रिज्याकोटिज्ययोर्वर्गांतरंनयोगांतरघातसमइतिकोटिज्यात्रिज्यांतरेणभुजोत्क्रमज्यातुल्येनकोटिज्यात्रिज्यायोगोभुजोत्क्रमज्योनद्विगुणत्रिज्यातुल्योगुणनीयोजातोभुजक्रमज्यावर्गः

अत्रोत्क्रमज्यागुणितोत्क्रमज्यारूपउत्क्रमज्यावर्गोयोज्यः।कर्णवर्गोभवति।तत्रगुणगुणितयोज्ययोर्जकृयो
र्जिताज्जातादिगुणत्रिज्या।इयमुत्क्रमज्यागुणातस्याः मूलंदलंग्राह्यमितिचतुर्भागेदत्तेगुणहरोगु
णोनापवर्त्यत्रिज्योत्क्रमज्यानिष्पन्नेरितिसम्यगुक्तं।अत्रवेनेयंदृग्मध्येगुणाश्चतुर्विंशतिभिस्तारूपादेयइ
तिशास्त्रांतरप्रसिद्धेर्विज्यार्द्धंत्रिज्यागुणइत्यनेनगुणइष्टस्यजीवापरत्वादाद्येश्चतुर्विंशतिभि
स्ताजिनाःकल्पितास्तःपूर्वोक्तप्रकारेणसिध्यंतीत्याह।एवमिति।प्रकारांतरेणाह।त्रिज्योत्थश्चतुरिति।
संसिद्ध्यैगुणादितिप्रश्नस्योत्तरमाह।नमेमध्यइति।यस्माद्दूरस्थोदृष्टानक्षत्रवलयेचक्रयंत्रादिनाम
ध्यतुल्यंग्रहंनपश्यतीतितेनाहर्गणागतग्रहस्यास्पष्टता।गगनेयोदृग्नपश्यतिसस्पष्टग्रहइत्युच्यतेम
ध्यमस्पष्टयोरंतरंस्पष्टं।तस्मात्स्पष्टग्रहज्ञानार्थंतद्दोःफलंमध्यखेटेक्रियतइत्यर्थः।मध्यास्पष्टग्रहसदृशो
पलंभःप्रत्यक्षसिद्धस्तथापियत्रकेनचित्कारणेनभाव्यमितितदाह।यस्माद्दूमेर्मध्येभवलयस्यापिमध्यं
स्याद्यस्मिन्क्षेत्रेभमतिस्वचरोनास्यमध्यंकुमध्येस्यादितिकारणंकल्पितं।तस्मात्कारणाद्दूस्थोदृष्टानक्षभ
वलयेमध्यतुल्यंग्रहंपश्येत्।यस्मादिदंतस्मात्तद्दोःफलंग्रहेखेटेक्रियते।भूमिकेंद्रगतभवलयकेंद्रेतु ल॰न॰ २६
कुत्रयद्भ्रमणवृत्तकेंद्रंकथंवनुज्याकोटिज्ञानंकार्य्यफलज्याकथंवकोटिकर्णसाधनंकुत्र

मध्यग्रहस्थानंकुत्रस्पष्टग्रहस्थानंकुत्रोच्चनीचस्थानंकिंनामकेंद्रंभुजकोटिकुत्रभुजफलोपलंभःकथंचग्रह
वक्रमार्गत्वोपलंभइत्यादिप्रतिपादनार्थंशेषकद्वयमाद्यैःकल्पितं।एकाप्रतिमंडलभंगिरन्यानीचोच्चवृत्तस्या
भूमेर्मध्येरवेर्वलयस्यापिमध्यंयतःस्याद्यस्मिन्क्षेत्रेभमतिस्वचरोनास्यमध्यंकुमध्येस्यादितिवोपार्थंशेष
कंविलिख्यप्रदर्शयेदित्याहपूर्वापरायतायामिति।एतत्सुधियोपायदर्शनायान्यत्पठतीत्याहादिव्यज्ञानमिति।
त्रिभज्यकासंमितकर्कटेनेतिभंगीद्वयंस्पष्टमुक्तं।भूगर्भस्थितिजाद्दृष्टक्षितिजंभव्यासार्द्धयोजनैरूढ्यु
नंमितिमध्यमस्वेष्टभुक्तिरित्थंरज्ञामानेनमहीसुवृत्तामिस्फुटंगतियोजनैर्गतिरितिकलास्तदाभव्यासा
र्धयोजनैःकिमितिगतिरित्थंरज्ञाःसिध्यति।ननुप्रतिमंडलयानीचोच्चवृत्तेयद्यानमन्यथाप्रतिभा
तीतितयोःकियथार्थमित्यत्रतआह।मंदोच्चवृत्तेयदिति।नीचोच्चवृत्तइति।प्रश्नैःवृत्तस्यकल्पनाद्वयस्यफ
लार्थत्वात्तस्य-म-स्यप्रकारद्वयेनापिविरोधादुभयमपितथ्यमित्यर्थः।द्वयोश्चेद्यकयोःफलमेवंदर्शनार्थ
माह।भंगिद्वयमितिं।द्वयोश्चेद्यकयोरन्यथाभानंदृष्टांतेनसाधयति।यथाभेमेदिति।मध्यगस्यस्वकक्षा
व्यवस्तेत्रजेदिति।अत्रतद्वृत्तविस्तृतत्रकक्षावृत्तइत्यर्थः।फलासवृत्तसाधनेयुक्तिमाह।शीघ्रनीचोच्चवृत्तस्येति।
केवलवासवशीघ्रफलसंस्कृतमध्यमतुल्यंयदाशीघ्रोच्चंतदाशीघ्रफलार्थंयोदृष्टस्तस्माद्वृत्तविस्पष्टग्रहा

फलसाधनं कृतं अन्यत्स्पष्टाधिकारार्थः केषांसुगमः केषांकठिनइत्याह। येषामगणितायपियुक्तीति॥ ॥ अथ
मूलश्लोकोक्तगणितमगाह्यस्पष्टाधिकारावसानाय॥ ॥ अथगोलबंधोव्याख्यायते। तत्रादौगोलरचनामाह।
सुसरलवंशशलाकावलयेरितिवृत्तेन। अत्रवंशशब्दोपात्तोपलक्षकः। वृत्तादौऋक्षयुक्तेति
वृत्तेसंक्षिप्तसर्वोपिगोलबंधउक्तः। इष्टनरजानियत्रनरशब्दोपलक्षणार्थः। खगोलकेरनंत
मपंचकेनाह। पूर्वापरमित्यादिना। द्वाभ्यांदृग्गोलबंधमाह। बध्नातीतिगोलवृत्तेरिति। नगोलबंध
माह। याम्योत्तरक्षितिजवृद्धित्यादिना। तद्गुणाःसौरोक्तइत्यनायुतत्रयंकल्पेऽयनांशभगणा
इतिवदताकल्पसौरवर्षविशेषायशास्त्रितएवायनांशसाधनेहरःस्वीकृतः। कथमन्यथाविंशतियुणि
तमयुतत्रयंतद्गुणइतिवक्ष्यतेयुतत्रयगुणोक्तातद्गुणभगणेभ्यएवनयनांशाःसाध्याइत्युपायमतुल्येव
सिद्धवत्संजातंपातंक्षिप्तास्वेऽयनैःसाध्यइत्युक्तंतेभ्यस्तद्गुणभगणेभ्यस्तद्गुरीत्याजातःपातस्तज्जा
तपातइतिवक्ष्यतेयत्तत्संजातंपातमित्युक्तंतस्यायमर्थः। तत्रहेतुगोक्तंतद्गोचंद्रोयुतत्रयंचमरा ३०·२·
२६
ज्यतेतेभ्यस्तद्गुणकारागतपातविशेषोक्तजातःपातःस्तत्संजातःपातइत्युक्तं। कल्पगतवर्षेषुविंशति

युतत्रयगुणितेषु

भक्तेकल्पवर्षभक्तेषुफलंतुकल्पसायनीतिताद्वाएवहरःस्वीकृतइतिगम्यते। सौरेषट्शतद६००
मितमहायुगेभगणाउक्ताःतेनैकभगणभोगवर्षाणि७२०० तत्राष्टशतवर्षैपरमाःस्पष्टविंश
तिमितायनांशावृद्धिर्भवति पुनस्तेरेववर्षैपनायनांशानांरासेनाभावोभवति। ततस्तेरेव
वर्षैरूणायनांशानांवृद्धिःपरमास्पष्टविंशतिमिताभवति। पुनस्तेरेववर्षैरूणायनांशानांरासेना
भावइतिवृद्धिह्रासात्मकपदचतुष्टयात्मकएकोभगणइतिस्वीकृतंब्रह्मसिद्धांतेप्युक्तं। ककादिस्थाद
गादिस्थाःस्पष्टेरदगवाजुरवं। प्रत्यग्देयांतियाम्योदग्गमनेविहितेपियतः। तस्पश्चाच्चलितंचक्रमुपा
वारोमतियपि। ककादिस्थेषुसप्तर्षिषुतेषांयंत्रेणयाम्योत्तरवृत्तेनतोन्नतोज्ञेयाः। तेभ्योविलोम
प्रकारेणमध्यमृक्षांशज्ञेयाः। एवंमृगादिस्थेष्वपि। ककादौमृगादौयाम्यमुत्तरमयनंचलोकप्र
सिद्धं। तत्र ककादिस्थानामपक्षितेयाम्यगमनेयदिसौम्यागमनमेवप्रतीयतेतदायनांशाःपश्चाच्च
लनमित्यर्थः। अत्रककादिस्थितकालोवधिकालस्तस्मादनंतरंअयनप्रवृत्तौचक्रंपश्चाच्च
लनं। अवधिकालात्प्रथमायनचलनेप्राक्चलनमितियुक्तं। क्रांतिमंडलनाडीमंडलसंपातस्य
प्रदेशाच्चनप्रदेशांतरेगमनायोगात्कथंचक्रचलनमित्यत आह। उपचारोयमिति सप्तर्षिभय

राणां कर्कादिस्थितेः प्राग्मध्यमयनप्रवृत्तिश्चलनाच्च ऋक्षसमूहस्यैव चलनमिष्यते। एवं कर्कादिस्थत्राणां मध्यमक्रान्त्यन्तरायेयंत्रेभुजाज्ञासेषंनवयंज्ञानामंतरमयनांशाः एवंप्रत्यहंमत्रगतिज्ञेया। त्रिंशद्भक्त्योयुगेनोनाचक्रंभाकृपरिलंबते। तद्गुणाद्दिनेभक्ताद्युगणाद्यदवाप्यते। तद्दिनस्थिप्रादशगतांशाविज्ञेयाअयनाभिधाः। इतितत्साधनोपायःकृतः। सौरमतेसंक्षतिर्दृष्टोकल्पाते।१९७२९४८०२५अयनांशाःवर्षस्यैव। प्रतिवर्षमयनांशाद्विंशत्युत्तरशतद्विकलाः। नुजालग्नते प्रतिवर्षंद्विर्विकलाद्या५२।५४मतभेदप्रत्यक्षोपलब्धायसिध्यंतितएवायनांशाग्राह्याइतिभाष्येसम्यगुक्तं।अयुतत्रयंकल्पस्यत्रिंयुतत्रयस्यलक्षसंख्याचक्रलवेनत्रियुतत्रयंकल्पइतिवापाठःसाध्वीयान्। व्यस्ताइत्यनेनपूर्वगताउक्तायावंतोपरगतास्तावंतएवऋणगताइतित्रियुतषट्कल्पेभवंतीतिनाकंचिद्विरुद्धं। एवंक्रांतिपातस्वरूपमुक्त्वाशरपातस्वरूपंशरसाधनार्थंतत्संस्कारक्षेपाहाह। एवमिति। पतनंपातः पतनंसम्मिलनं। तत्रनाडीमंडलक्रांतिमंडलयोः किंचिदवयवसंयोगेपिसंयुक्तोवितिप्रतीतेः संयोगसंपातः क्रांतिपातइत्युक्तं। क्रांतिमंडलशरमंडलयोः संपातः शरपातइत्युच्यते। ननुस्पष्टवेटेक्रांतिपातयुक्तायथाक्रांतिःसाध्यतेतथाशरपातयुक्तास्पष्टवेटातुनोनशरः साध्यतइत्यत्रप्रश्नस्योत्तरमाह। मंदस्पुटोद्भूप्रतिमंडलेहिनि। मंदस्पष्टसाधितः शरःसंवदतीतिपातस्यशीघ्रप्रतिमं

उलेभ्रमणमभ्युपगतं। क्रमणंक्रांतिः। कस्माक्रमणमितिनाडिमंडलादिति। नाडिकामंडलान्निर्यगात्पमदृश्यनेनप्रागभिहितं। तिर्यगितिदक्षिणोत्तरभावेनेत्यर्थः। तत्रक्रांतिमंडलावधिःक्रमणंक्रांतिर्मध्यमा। चंद्रादीनांक्रांतिमंडलाद्धरः क्षेपस्तावधिः। नाडिमंडलाक्षेपस्तावधिचंद्रादियुक्तनक्षत्राणांस्पष्टाक्रांतिः। क्रांतिपातस्थानस्थेस्पष्टग्रहेमध्यमक्रांतेरभावः। शरपातस्थानस्थेमंदस्पष्टेशराभावः। क्रांतिपातादयतःस्पष्टतस्त्रिभेंतरेपरमामध्यमक्रांतिः। चतुर्विंशसंज्ञितात्। शरपातात्कादयतःस्पष्टतस्त्रिभेंतरेशीघ्रकर्णनभक्तास्त्रिभज्यागुणाःपठितपरमशरभागायावंतःसंपद्यंतेतावान्परमःशरस्तत्रेतिसुगमं। उच्यतेमेषादेरनुलोमंगच्छतीतिग्रहोच्चांतरतःफलंसाधितंएवंदिग्ज्ञातयोर्मध्यंतरतुल्यमेवतयोरंतरमितिप्रसिद्धेः। मेषादेरारभ्यचनुलोमगत्वाशनग्रहस्यराश्यादिप्रतिलोमगस्यशनातपातस्यांतरंपातग्रहयोगेनैवसिध्यति। यथाऽनंदकाननाख्येमहिक्षियोजनाष्टकांतरेप्रयागेस्थितस्यवाराणसीतेः पंचदशयोजनांतरेपूर्वदिग्वस्थितेकुसुमपुरेस्थितस्यचकियदंतरमितित्रयोविंशतियोजनात्मकमंतरंतथात्रेतिसुगमं। सौरेतुविलोमगस्यागतपातस्यचक्रशोधनेनयावदवशिष्यतेतावन्नाराश्यादयवयवेनमेषादेरनुलोमगस्यापातचिंतंसायत

इतिपातत्रयोरेकदिग्वस्थितत्वेनांतरंस्तोकंयद्यपिवक्रगतोवाग्रहेक्रांतिःसाध्यते।ननुनाडिमंडलक्रांति
मंडलयोरेवस्पष्टनाडिमंडलाश्रितत्वेक्रांतिपातस्यानस्पष्टग्रहेसाधनस्यस्पष्टग्रहेक्रांतिसाध
नोक्तेर्मध्यक्रांत्यभावस्तत्रवनाडिकावृत्तरवेरंतरालेपमइत्यनेनस्पष्टक्रांत्यभावोपिस्यात्।
स्पष्टक्रांत्यभावोद्वयासंभवतिमध्यमक्रांतिशरयोःस्पष्टक्रांतिखंडयोर्युगपदभावात्तुल्यत्वेने
दिग्न्यत्वविरोजनाद्वा।तत्रयुगपदभावोपिसार्वदिकःकादाचित्कोवा।क्रांतिपातयुतात्स्पष्टरवेरा
नमध्यमक्रांतिसाधनात्शरपातयुतान्मंदस्पष्टाच्छरसाधनात्क्रांतिपातशरपातगतिवैषम्येण
मंदस्पष्टस्पष्टयोरंतरसद्भावेनचसार्वदिकयुगपदभावोनसंभवतिमध्यमक्रांत्यभावेमध्यमक्रां
त्यभावस्तदाशराभावइतिनियमाभावान्नाडिकावृत्तरवेर्यंतरालेपमइतियदुक्तंतदयुक्तं।किंचात्ररवेरश
ब्देनस्पष्टोवामंदस्पष्टोवाविवक्षितः।स्पष्टविवक्षायांस्पष्टादेवशरसाधनंस्यात्।मंदस्पष्टविवक्षायां
मध्यमक्रांतिसाधनंनेदंस्पष्टादेवस्यात्।तस्मान्मध्यमक्रांत्यभावेनाडीमंडलाश्रितस्यस्पष्टग्रहस्य
शरोस्त्यास्पष्टक्रांतिर्मध्यमक्रांतिस्तद्भावेनाडीमंडलादन्यत्रस्थितस्यापिस्पष्टक्रांत्यभावश्चस्यादि
तिनाडिकावृत्तरवेर्यंतरालेपमइतियदुक्तंतदयुक्तमितिचेत्।उच्यते।यत्तुविमंडलेभ्रमतीतियु

श्रितविमंडलावयवनाडीमंडलसंपातोयदातदास्पष्टक्रांत्यभावः।क्रांतिवृत्तस्थस्पष्टग्रहविक्षेपंयदानां
डीमंडलेभ्रमतीतियत्साश्रितविमंडलावयवेनाडीमंडलसंपातोयदातदामध्यमक्रांत्यभावोभवति
नतदास्पष्टक्रांत्यभावोभवतिग्रहस्यशरायोगेसतिवातत्रयंत्रवेधविधिनाग्रहस्यस्पष्टाक्रांतिःशरोपि
प्रत्यक्षंगृह्यते।प्रत्यक्षोपलब्धशरस्तुमंदस्पष्टसाधितशरेणवसंवदतीतिमंदस्पष्टाच्छरसाधनंकि
यते।मध्यमक्रांतिःस्पष्टादेवसाध्यते।प्रत्यक्षदृष्टेकिमनुपपन्नंनामेतिसर्वंशोभनंमंदस्पष्टाद्वा कू
प्रतिमंडलेभ्रमतिति।तत्रैवतस्यलक्षितयंत्रवेधविधिनायाशरानुपलब्धिस्तयाशराभावोगृह्यते।
शराभावस्तवश्यंगणितागतपातचिह्नाकृष्टेहणाभाव्यंमेषादेर्गणितागतंमाघंपातंविलोमं
दत्वाचिह्नंकार्यं।तच्चिह्नेषुक्षेपंतरितंचिह्नेवामेषादेर्भादिकंग्रहंतुलोमंगत्यानश्यंभवत्येव।तत्रय
दानीमादीनांशराभावोदृष्टस्तदामंदस्पष्टएवपातचिह्नेदृष्टइतिशीघ्रप्रतिमंडलेत्रमणमा
क्षिपतितीमंदस्फुटोद्राग्गतिसम्यगुक्तं।यस्मादूनितागतपातोमंदस्पष्टोज्यतइतिसिद्धमतो
विलोमशीघ्रफलसंस्कृतपातयुतस्पष्टशरसाधनफलाविशेषाद्युक्तमित्याहपातेथवेतिकेव
लयोज्ययोजकयोगेशीघ्रोनयुक्तोज्ययोजकयोर्वायोगेफलाविशेषाच्छीघ्रफलतुल्यमत्रेष्टकल्पि

तं। त्रिज्यातुल्ययासपातमंदस्पष्टदोर्ज्यया शीघ्रकर्णेनभक्तास्त्रिभज्यागुणाग्रहरक्षेपभागाल प्यंते
तदेष्टयाकिमिति शरसाधनं स्यात्। यद्वासपातमंदस्पष्टदोर्ज्यापठितशरगुणा त्रिज्याभक्ता शीघ्रप्रति
मंडलस्थशरः स्यात्तस्यकक्षावलयीयकरणार्थंकर्णानुपातः कृतः। सोमाद्दिपातामंदस्पष्टस्त्रीयत्वे
नशीघ्रप्रतिमंडलस्थजातश्चंद्रपातस्य कुजावस्थानं चंद्रशीघ्रप्रतिमंडलाभावादित्यनाह।
चंद्रस्यकक्षावलये हिपातइति। मंदस्पष्टस्यैव चंद्रस्यसर्वदास्पष्टत्वेनस्फुटाद्विधोर्मध्यमपात
युक्तादिक्कर्कांकथंचंद्रस्यमध्यमपातएवकक्षामंडलस्थोजातोनान्येषामिति नात्रोक्तीयंयु
तोविचित्रा फलयासनात्रेतिनिरूपितत्वात्। अत्रमंदकर्णेनयद्धृतमुपचयेनतत्कक्षामंडलमिति
कर्णानुपातोनस्फुतः। बुधशुक्रोच्चसाधितोशरोबुधशुक्रशरोभवतइत्यत्रचतुर्वेदेनाध्यवसायः क
र्तव्योपपत्तिमाह॥ येचत्रपातभगणाइति। चलाद्विशोध्यइति। मंदस्पष्टेनशीघ्रोच्चंशीघ्रकेंद्रं
तत्रपातोयोज्यःसंपूर्णपातोभवति। ससंपूर्णपातोमंदस्पष्टेयोज्यः। शरसाधनार्थंकेंद्रंभवति। तत्रशो
ध्यमानंस्वल्पत्वान्नियतेनलग्नं। स्पष्टबुधशुक्रोच्चाभ्यांशरसाधनेकीदृशःस्पष्टपातःसाध्यतइति
प्रतिपादयति। स्फुटोनशीघ्रोच्चयुतोस्फुटइति। स्पष्टपातस्यानंदर्शयति। नगोलेस्फुटएवपातर्

तिग्रहेतिपादितार्थस्यवैराग्यमाह। यद्यस्यगोलेकथितापमंडलमिति। अत्रभाष्यंस्पष्टं। ईप्सितक्रांति
तुल्यैतरेसर्वतोनाडिकाख्यादित्यादिस्पष्टं॥ ॥श्रीमत्कोकणवासिरघुनाथदैवज्ञस्यबंधुःस्फुटः॥
अथत्रिप्रश्नाध्यायवासना॥ तत्रकुज्याचरज्यास्थानमाह। उन्मंडलक्ष्मावलयांतराले इतिग्रहेच
रसंस्कारयुक्तिमाह। निरक्षदेशइति। आदाविदि। अस्माकंरेखाकर्णदयास्तत्कालिकायद्यपेक्षि
ताइति चरस्फोसैंरः क्रियते। महदहः किमहोरजनीतनुरित्यस्योत्तरमाह। नाड्याहतयादिति॥
अतश्चेति। षष्टिघटिकोकितद्युरात्रवृत्तावयवोयावत्स्वक्षितिजोपरितावद्दृनमितिसम्यगुक्तं। निरक्षे
बद्धक्षितिजमुन्मंडलंतेनसर्वोन्यदिनानिवृत्तानि। उन्मंडलादुपरियावद्दोरात्रंतावद्दृश्यस्यात्। उत्तरध्रुवेनःस्वोन्नतरक्षितिजादुपरिदृश्यतेसाक्षदेशस्थैरस्माभिरितिसोम्यगोले
स्वक्षितिजादुपरिउन्मंडलंयाम्येपश्चेतिमहदहरित्यादि। निरक्षेकुजादन्योन्मंडलाभावात्युनिशोः
समत्वमित्याह। सदेति। यत्रषट्षष्टिभागाःपलांशास्तत्रकर्कादिस्थितार्कषष्टिघटीमितेदिनंनत
न्नरात्रिः। किंत्वर्कखंडाद्धेतंक्षितिजस्थक्षणमात्रंभवति। तस्मिन्नेरोमकरादिस्थार्केसायनषष्टिघटी
मितारात्रिर्नकिंचिद्दिनं। तत्रायकर्किबाद्धेलोहित्यदर्शनंक्षितिजे। सषट्पलांशपर्यंतंयुनिशोःषष्टिघ

टीमध्येवस्थानं। तद्देशादूर्ध्वं षष्टिघटिकाभ्योधिकमवस्थानं संभवतीति तस्यैतिपादयति। षट्
षष्टिनाडीभ्यधिकोपलोदया इति। लंबाधिकाक्रांतिरिति। यत्रदेशेलंबोदयाश्चतुर्विंशतिभा
ज्योत्पन्नास्तत्रैवार्कस्यलंबाधिकाक्रांतिरुच्यते। यादृशेदेशेयावत्यवयवेस्थितेर्कस्यलंबा
धिकाक्रांतिर्यावत्सर्यंतमुच्यते तादृशेदेशेयावत्यवयवस्थितार्कस्तावत्सर्यंतं दृश्यतइति
तावद्दिनमुक्तं। तद्होरात्रंवृत्तस्यक्षितिजोपरिस्थितत्वात्। मेरौतुनाडिकामंडलंक्षितिजं।
तत्रोत्तरक्रांतिः सर्वापिलंबाधिकेति सौम्यगोलस्थेर्कषण्मासपर्यंतंदिनंभवतिइत्याह।
ततश्चमेरावितिं। भवतिकिंचुनिशायुनिशासिनांइतिप्रश्नस्योत्तरंदत्तं। मेरुस्थानंबडवानल
स्थानं नाडीमंडलंकथंक्षितिजमितिप्रतिपादयति। विषुवद्वृत्तेमिति। उन्मंडलस्थध्रुवस्तिष्ठांस
स्तत्रैवभवतीतिवद्नाडीमंडलंयेषांसमंमंडलंनिरक्षंभवति। तत्रनाडीमंडलस्यक्षितिजत्वेकि
चित्रं। नदेवदेयानांसव्यापसव्यकरणंभवतीत्याह उत्तरगोलइति। दिनरात्रिलक्षणमाह। दिन
मिति। अत्राचार्यैर्लक्ष्यतावच्छेदकंसूत्रेनिष्टमनुक्तदिनदृक्तं। पितृब्रह्मदिनसाधारणंनक्तं। अ
न्यथानुक्तष्टगानामिष्टकालार्थंस्यात्। मध्यमाधिकारेवातिकेलक्षणंदृग्गतिव्याप्त्यव्याप्तिविचारो
र्थंच

वत्सदिनवद्रात्रिनक्तः। वत्सार्किनान्यायपरः। चंद्रष्टग्वासिनामप्यहोरात्रव्यवस्थातीति दृष्टां
तेनाह। कुष्टगानामिति। संहितासुयदुत्तरमयनंतद्देवानांदिनमिष्टकृत्यायत्वत्तेनाह। दि
नंसुरेणामिति। ननुसौम्यायनस्यदिनत्वसंकेतोनिरर्थकः। तदस्यतआह। फलकीर्तनायतदिति।
यावद्दिनेनादृश्यंतावद्दिनमितिलक्षणंपाक्षेपिसौरचांद्रनाक्षत्रेषुदिवससंकेतोयथास्यात्। तः कार्य
विशेषाम्नानार्थंतथाफलकीर्तनायसौम्यायनेदेवदिवससंकेतइतिभावः। उत्तरायणमेवदेवदि
नंयास्तमनियायदर्शनान्मनिसयुक्तिकंदृष्टं। इंद्रांतमारोहंतीति। पितृषुकिंवाक्रियासमभिनं
तिप्रश्नस्योत्तरमाह। विषोरूर्ध्वभागइति। नाधोंतरत्वादिति। सुवर्णब्रह्माकरतलकलितामलकवत्
त्रयस्यतोब्रह्मणःकल्पपर्यंतंदिनंभवति। सूर्यस्यतावत्कालपर्यंतंस्थित्वात्। युगसहस्रमितिमितिप्रश्न
स्यपदमितिदृग्गतेरित्यनेनोत्तरंदत्तं। नन्वेतयस्यकिलार्कलवः समाइतिप्रश्नस्योत्तरमाह। योहिप्रदे
शोऽपमंडलस्येति। नविषयेक्षितिजेपितेसमाइतिप्रश्नस्योत्तरमाह। उयेदमेयाम्यनेताइतिक
र्कोदयइति। निरक्षेमेषादिरात्रित्रयस्ययोगः पंचदशघटीतुल्यः। साक्षेमेषादिरसभयोगस्त्रिंश
द्घटीतुल्यएवभवेत्। मत्रकृपादारइति। कथंवरवंडेनयुक्तानिरक्षोदयाःस्वोदयाभवंतिइत्याह। मेषा

देरिति। कन्यातादिति। सायनमेषादिः कन्यांतश्च क्रांत्यभावाद्भमंडलक्षितिजसंपातेलगतीति। मेषादेर्मिथुनांतः कन्यातादनुपोनदृक्कर्मेति। यो हि यद्देशोपमंडलस्यस्यादिक्षितिनिरक्षोदयाः स्वदेशोस्युरित्यंतमेवबोधनीयमित्याह। क्षितिजेज्जादिलग्नेति। खगोलतुर्यगोलबध्वाखगोलक्षितिजेभगोलस्थमेषादिलग्नाउदयोपपत्तिर्बोध्यतेरपिबुध्यते। राश्यस्तवस्त्रिविधाः। मध्यास्तवउदयास्तवोस्तास्तवश्चेति। तत्रनिरक्षदेशारेखादेशायास्तेरक्षवृत्तैकदेशेनिरक्षोदयास्तएवसाक्षेनिरक्षेमध्यलग्नास्तेनभवंति। स्वोदयास्तुस्वक्षितिजसंपृक्तएवनिरक्षसाक्षक्षितिजसंपृक्तत्वादधुनाराशीनामस्तास्तुस्तानार्थमाह। योभ्युदेतिरिति। यन्मेषस्योदयमानंतत्तुलायाअस्तासुमानेमिथुनादिस्थेतत्तुलाराशिरिति। उक्तंयच्चरोदयादितत्क्रियदवधिनिर्वर्ततीत्याह। नान्यसंस्थितयेति। लग्नलक्षणमाह। यत्रेति। तात्कालिकार्कस्करणकारणमाह। लग्नार्थमिति। यत्रकर्कमिथुनस्थितार्कोदृश्यतेसततंमकरकार्मुकस्थार्कैःकदाचिन्नदृश्यतेतदंदृश्यतइत्याह। यत्रेतिलक्षणयुक्तंदोदितराशिलक्षणंकृतंनदृश्यतेति। राशेरिति। तदुक्तमन्यदपिदूषय×त्यंशायुतिर्हि। एवंराशिचतुष्टयस्थितार्कःसततंदृश्यते×तिं। षट्षष्टिरिति। कुज्याकुज्योपमसमनरोन्नतंवादिकानांविहगोलयेदृक्क्षितिजंतदूर्ध्वगक्षि

ल॰ च॰ २२

॥ मेरोतुराशिषट्कस्थितार्कःसततंदृश्यतइत्याह। यत्रेति ॥

तिनंभवति। दृष्टाभदृष्टगोलेनभूगर्भक्षितिजादृष्टक्षितिजंभूव्यासार्धयोजनैरेवोदितमितिस्वभूक्तिर्थंराशिनांकलाःस्वोदयाःस्वोदयास्कर्मेति। गतियोजनानीतिथंस्वतुल्यैर्व्यासार्धयोजनानीतिस्पष्टं। चंद्रप्रभार्थमित्यत्रहतेरुन्नतंयुनिशमंडलेकुजास्यावनयुतिविशोहितज्यकोदयनेनसावनघटीजन्यखासलदेवकालसाधनमुचितं। असकृत्करणेनाक्षत्वंभवति। नहिनाक्षत्वंक्षेत्रोपयोगीतिस्यदृष्टं। थैरसकृत्स्वापितंतेषांस्यदृष्टमेनदूषणं। गणितगोलानभिज्ञानांपूर्वग्रंथतात्पर्यानभिज्ञानांमायतन्मतिपन्नपूर्वग्रंथार्थयातिणांगणितेकेचित्करणंव्यसनंघृतादिव्यसनवन्निरर्थकमित्याह। जानंतियेनभिपुणंगणितंसगोलंतेषांहितंत्रकरणव्यसनंवृथेति। आद्यायत्रविचित्रभंगिभिरपिरचितेतत्प्रसिद्धेक्रियालघ्वीवाथसमातदेवसुधियाकार्यप्रकाशतरमिति। नूतनग्रंथकरणसार्थकमितिपूर्वमेवयोतितं। येतुविपरीतविशेषंगृह्णंतोमत्कृतोयंविशेषइतिवदंतितन्नामापिनगृह्णंतिपरग्रंथंसंपूर्णमभ्यस्यस्वनाम्नातंतथोदर्शंग्रथंतिते निरयगामिनएव॥ ॥श्रीमत्कोकणवाडियमगाधिप्रश्नसहासना॥ ॥अथग्रहणवासना॥ तरणेःग्रहःकिंप्रतीत्यामितिप्रश्नस्योत्तरमाह॥ पश्चाद्भागादितियेनमेघादिनाछाद्यतेतेनकापिरुग्नःक्वचिदपिहितइत्याह॥सम

कलकालेइति। चंद्रकक्षास्थभूछायायेवसमकलकालएवएवचंद्रःछायतइतिछायाद्वयोःसमकस्व
मुक्तं।इंदोःछाम्नाग्रहइतिग्रन्थस्योत्तरमाह।पूर्वार्धमुत्तरइति।छाकग्रहणमित्यत्रप्राग्भितमित्यु
क्तमेवसर्वत्र।भूछामित्यत्यते।अनुपातेनभरभादेर्ग्यविस्तारोक्ताभ्यामित्याह।अनुपातादितिचंद्रग्र
व्यस्तदिशःस्युरेरेस्यकारणंवदति।भूभेंदोरिति।सूर्यग्रहेकांतिवत्तस्यस्पर्शाद्वाद्वाद्वाद्वकर्षंद्वो
विमंडलस्यद्वारांतरेणद्वारदिक्येवभवति।ग्राघःग्रत्यक्षंदृते।कुतग्राहकइतिचंद्रव्यस्तद्वारदिश्येवे
तिस्यष्टं।सूर्यग्राहकाच्चंद्रग्राहकोविशेषःस्पष्टएवापेक्षितइतिसयुक्तिकंतद्वयेनप्रतिपादयति।छादक
इति।अर्धखंडितंतनोरिति।दिग्देशकालावरणादिभेदेरुभयग्रहणेनराहोर्ग्रहकत्वंसंभवतीतिवदतां
वेदसंहितापुराणविरोधात्मतंदूषणमित्याह।दिग्देशकालावरणादिभेदादिति।होरास्तमआसुरिः
सूर्यतमसाविध्यापेयाग्यःश्रुतयः।राहुयस्तेनिशाकरेत्यादिपुराणानि।राहुरदर्शादृष्टःग्रदक्षिणंहति
विप्रादीतिसंहितारहुकारितंग्रहणमितिप्रतिपादयति।ब्रह्मणुतेनयाश्रुतिर्दर्शितारहुग्राहकत्वेसा
श्रुतिःश्वेतायाःश्वेतवत्साया:स्तुत्यर्थतिचतुर्वेदाचार्येणराहुग्राहकत्वासयोगःसमर्थितः।नासयोगावेक
थमनयाराहुग्राहकत्वंसिध्येदित्युक्तं।तदयुक्तं।नहितास्ययोगावेनप्रामाण्याभावःसिध्यतीतिभूतार्थवादग्र



माण्यनदेवतावियदादिसिद्धेर्वद्राहुग्राहकत्वंसिध्येत्येव।मतांतरेणोच्यार्थमाहाराहुःकुभामंडलगइति।उ
परागपरागतंतमोराहुरितिपुराणादमतं।कुमुदिनीपतिपतोराहुरितिगणितमतं।कर्णकेःस्वाभिमतराहो
र्नग्राहकत्वमित्युच्यतइतिनकोपिविरोधः।किंतोसिद्धेनुतःकुतइतिग्रन्थस्योत्तरमाह।यतइति।लंबनोपप
त्यर्थंछायकमाह।इष्टापवर्त्तितामितिं।तिर्यग्रेखायुतामिति।वृत्तेति।भूवृत्तंचंद्रार्ककक्षावृत्तेचवृत्ता
भ्रगर्भांचंद्रार्ककक्षावृत्तपरिधिपर्यंततिर्यगूर्ध्वरेखेचविधेये।कक्षायांतिर्यग्रेखायुतोक्षितजमूर्ध्वरेखायु
तोरवार्धंचनिधेयं।तत्रपंचसहस्रयोजनपरिमितामूमिलंबनोपपत्यर्थंलिखितुमशक्येतिकेनचिन्म
हतेष्टापवर्त्तितालिखनीयेतिसभ्योक्तं।अंगुलचतुष्टयव्यासवृत्तेपिथेपंचसहस्रमितंकास्तएवपंचसहस्र
योजनांकाइतिकल्पनारिष्टापवर्त्तनेनकोपिदोषः।येनमहतेष्टेनभरापवर्त्तितातेनैववद्रार्ककक्षेअपिवृ
र्तनीयेइत्युक्तंतदपियुक्तं।योजनपरिमाणसाम्यसंपादनेत्यर्थत्वाद्वेत्यकत्वात्।भूमिरूपंचयकलिखना
दितिलेखैकलिखनेबालानांग्रहितिबोध्यंभवतीतिमिलितावियुक्तं।रवार्धंचद्रार्कौकृत्वानतव्यविद्याद्वा।
दृश्याचार्यांद्राकैर्नतोन्नतावंदृइति।लंबनोपपत्तिदर्शयति।एकमिति।नहिभूगोलैकस्यचिदवस्थानंसं
भवति।तत्रस्थितस्यभूव्यवरोधेनचंद्रार्कदर्शनंचसंभवतीतिभूमध्यतःसूत्रमित्युक्तं।दृष्टभूएकगा

नद्वयस्यापारणत्वाल्लंबनमात्रस्याभावोऽत्रविवक्षितः। यदाप्यम्योन्तरदृक्तुल्यैरविर्दृश्यते तदापूर्वापरलंबयो-
रतिवक्रमुचितं। खस्वस्तिकस्थापियाम्योन्तरदृक्तुल्यैर्दृश्यते यामोन्तरलंबनाभावो
दन्यदिति। लंबनलिप्ताः प्रदर्शयति। कक्षायामिति। चंद्रार्कयोः खार्धस्समांतरेणनतत्वात्। अवनिगर्भसू-
त्रेसदास्यांचंद्रार्कौसमलिप्तिकाविदृक्तुल्ये। लंबनपदप्रवृत्तिविनेत्याह। दृक्सूत्रादिति। दृश्यते खस्वस्ति
कगैरवौलंबनाभावस्यार्थात्। दृग्गर्भसूत्रयोरैक्यादिति। लंबनग्राह्यस्य पूर्वापरयाम्योन्तरलंबनाभावस्य
स्वीतेस्वात्। खस्वस्तिकगैरवोपूर्वापरलंबनाभावोऽविवक्षितइतिवाऽऽयदादृश्यते क्रांतिमंडलंसमनं
उलाकारंस्यात्तदेवयाम्योन्तरलंबनाभावस्वीकरणेनैवखस्वस्तिकगैरवौनतेरभावइत्यस्यापि
ज्ञानार्थत्वात्। यदासमनंउलवदपदृश्यतेतदाखस्वस्तिकगंनप्यलग्नंनतदेवत्रिभोनलग्नंभवति। तत्र त्रि
भोनलग्नदृग्ज्ञानएव। यथालंकायांवरपूर्वापरदेशांतरालाभावस्तथास्वस्वस्तिकगैरवौलंबननतयोरभा
वः। लंकायाम्योत्तररेखायांपूर्वापरदेशांतरालाभावस्तथायाम्योत्तरवृत्तस्थैरवोपूर्वापरलंबनाभावः। यथा
चलंकापूर्वापररेखायांवरालाभावस्तथाक्रांतिमंडलस्यसममंडलानुकारित्वेनतेरभावः। लंकापूर्वापरयाम्यो-
त्तररेखान्योन्यंत्रवरदेशांतरेणभवतस्तथाऽन्यान्यनतस्थलंबनावनतीस्यातां। अनापमंडलंघाचीनतिर्यग्दक्षि
णोत्तरेविवक्षिते। अत्रापमंडलस्यचंद्रविरुत्तमेवचंद्रपदेनोक्तमतेनतिलिप्तानामर्थमित्याह। अथेति। येक न. ल. ३४
क्षामंडलेतेत्रेति। दृक्षेपमंडलंनामत्रिभोनलग्नदृग्ज्ञेउले। ब्रह्मयुतेनत्रिभोनलग्नवशेनलंबनावनती

साध्येतेतेनत्रिभोनलग्नदृग्ज्यायाःसदृक्षेपोद्वयोरपीस्युक्तं। तच्चोपपन्नमेवेति। कुतोदृक्षेपानतिसाध
नंलंबनसियतआह। कक्षयोरिति। अर्कोक्तंत्रचंद्रोवलंबनमित्याह। यत्रत्रेति। पूर्वापरंत्रेति। यदिति। स्पष्टं।
लंबनानयनेरविदृग्ज्याकर्णस्त्रिभोनलग्नदृग्ज्यादृक्षेपश्चतेभुजोदृङ्नतिकोटिरिष्टक्षेत्रमस्ति। तत्रत्रिभो
नदृग्ज्योत्तत्रंयल्लंबनंसानतिर्भुजाःरविदृग्ज्यात्तत्रंदृल्लंबनंकर्णः। दृङ्नतिज्ञानतंस्पष्टलंबनेकोटिः।
दृल्लंबनतयोरानयनमाह। परलंबनलिप्ताभिस्त्रिज्यातारविदृग्ज्ययेति। परमलंबनानयनमाह। गत्यं
तरस्येति। कुतोगत्यंतरतिथ्यंशाःपरलंबनमित्यत्रकारणमाह। गतियोजनतिथ्यंशइति। गत्यंतरकलाभिः
षष्टिघटिकास्तदालंबनकलाभिः कइत्यनुपातेनलंबनकलानांघटीकरणमाह। स्युरिति। अथ
श्चंद्रोवलंबनमिति। प्रायतोरवेश्चंद्रः पश्चात्स्पष्टेवलंबितइत्युक्तं। पूर्वापरायोर्दृक्क्षेपयोः कथमृणधन
नतिर्लंबनंक्रियतइत्यत्राह। नीचेयमेयुतिरिति। इहाभावेति। खस्वस्तिकादन्यत्रस्थेत्रिभोनल
ग्नेरविग्रहणसमयेयद्याम्योत्तरमंतरेणाहृतयोरुपलभ्यतेसाभ्रदानतिः। इहसदृक्षेपेसंस्था
तानतिः। अत्रषट्षष्टिभागाः पलांशास्तत्रयथावस्थितंगोलेबद्धंक्रांतिवृत्तमेवभूगर्भस्थितिजं।
ततूस्थितिजयाम्योत्तरवृत्तसंपातेयदात्रिभोनलग्नंतदापरमानतिः। चंद्रार्कोदृग्ज्योक्तकालिकोपद्

षष्टिभागफलांशविषयेयदायाम्योत्तरसंपातेयदात्रिभोनलग्ननतदापरमानतिः। चंद्रार्कौक्षितिजस्थौ
भवतस्तदाभूष्टनरक्षितिजादुरात्मनरक्षितिजस्यभूव्यासार्धयोजनैरंतरितत्वाद्भूष्टक्षितिजाधो
रविचंद्रकक्षामंडलेभूव्यासार्धयोजनैर्लंबितेभवतः। कक्षयोरंतरंयाम्योत्तरंनतिरियंपरमा। अक्षो
दग्ध्यमक्रांतिसाम्येनावनतेरभावः। तस्मान्नयासंस्कृतः शरःस्यष्टःस्याद्ग्रह्यादेकेक्षाभेदा
दित्याहायाम्योत्तरमिति॥ अथवलनोपपत्तिः। वलतिर्तद्वलनंद्रष्टुःसममंडलमेवाचीक्रांतिमंड
लगोयैवयद्यागच्छति। ग्राह्यस्तुप्रत्यक्षेणाग्राह्यएवग्रहणसमयेयत्रग्राह्यकेंद्रंतस्मात्स्वदेशाद
स्यग्राह्यस्यकुत्रस्थश्चीदिक्कमितिविचार्यः। तत्रग्राह्यकेंद्रात्तद्बिंबेयदनुगतसमेमंडलेग्राह्याक्रांतिमं
डलानुसारिणीविंबनेमिगतायावत्तांतरेणवलतितद्वलनमितिप्रसिद्धं। इदंस्पष्टवलनमयनाक्षव
शेनसजातवलनसंस्कारेणभवतितत्रग्राह्यनेमिगतनाडीमंडलग्राह्यास्तदाक्षवलनं। ग्राह्यनेमि
गतनाडीमंडलानुसारिग्राह्यास्तंनेमिगतक्रांतिमंडलानुसारिग्राचीयावल्लंबनमायनं। यत्रकेंद्रे
तस्माच्चिरयात्तत्रत्नेम्यांपूर्वादिक्संमितिप्रसिद्धं। त्रिज्याचित्तोस्पष्टवलनंग्राह्यबिंबव्यासार्ध ल॰च॰
परिणतंग्राह्यबिंबेस्यादितिप्रतिपादयति। तुल्यजात्योरिति। संपातस्थविषुवद्वृत्तत्वयायाम्योत्तराक्ष ७५

वयोःस्यात्संपातस्थक्रांतिवृत्तावयवस्यदक्षिणोत्तराध्रुवाजिनलवांतरस्थौयोःकदंवयोःस्यादितिपरम
मानतंवलनंतत्रेत्याह। अयनंवलनमिति। अयनसंपौष्णितेग्राह्यकेंद्रंकातउज्जयिनीतश्चकुचतु
र्थभागेग्राह्यंयमकोटिरनपवर्तीतिन्यायेनदक्षिणोत्तरेक्यमित्याह। एकेवेति। जिनज्याघ्रीति। अ
नेनेवाक्षवलनंवदति। एवमिति। उन्मंडलमिति। क्षितिजेक्षयातुल्यमिति। याम्योत्तरवृत्तस्थेग्राह्यकेंद्रेक्षव
लनाभावइत्याह। तयोरिति। क्षितिजयाम्योत्तरवृत्तांतस्थेग्राह्यकेंद्रेतुपातेनसाध्यमित्याह। तत्रापेक्ष
क्रांतिरास्फुटेमिति। स्पष्टवलनपरमत्वस्थानंदर्शयति। एवमिति। स्पष्टवलनाभावस्थानंदर्शयति।
अयनइति। यदाविषुवत्क्रांतिवृत्तसंपातस्थेग्राह्यकेंद्रेक्षितिजेतदास्पष्टवलनंपरमंयदायन
संस्थेग्राह्यकेंद्रेयाम्योत्तरवृत्तेनदास्पष्टवलनाभावइत्यर्थः। लल्लेनोक्तमज्यायनवलनंसाधितंतद्व
यतिनस्पष्टवलनाभावइति। प्रकारांतरेणाह। सर्वतइति। तत्रेति। गोलइति। तन्नियमितिसूत्रो
णीति। कथंवाक्षवसूत्रांतइति। तृतीयप्रकारेणोपपत्तिमाह। अथवेति। अत्रग्राह्यबिंबगताक्रांतिवृ
त्तप्राचीसेयं। तस्यादक्षिणोत्तरनेःशरांतरंग्राह्यकइतिसुतानत्वादायनवलनानयनेसाध्यमक्रांतेरा
यनवलनंसाध्यतेयैःशरसंस्कृतमध्यमक्रांतेरायनवलनंसाध्यतेतेकुनुद्वयइत्याह। तंत्रेति। अयनव

शोनबलनमायनबलनमितिप्रसिद्धेरयनसंक्रेनस्योदगपागायनेमृगकर्किणोरितिपूर्वकतत्वादरसंस्का
रोनयुक्तएव। एवंजातकपद्धतावायनबलेपिवोध्यमेकत्रनिर्णस्तः॥ ग्रन्थार्थः सर्वत्रयुक्तएवायनग्र
ब्दस्यतत्रापिसत्वात्। अत्रमृगुकर्कादिपदंसायनपरं। कदंबपत्रमध्यंध्रुवासारितोनिबध्यच
तुर्थप्रकारेणाह। नक्रादिरिति। ततइति। कुंभादाविति। अंतरमिति। उक्तमध्यानिरासोयमिति। क्रां
तियाम्योत्तरमिति। द्वद्वांतादिति। अयनमिति। त्रिज्यावृत्तइति। समकीलयोरिति। समवृत्तइति।
द्युज्यायइति। षष्ठप्रकारेणाह। बलनंस्यातथेति। तत्त्रिज्यावर्गविश्लेषपदंनक्षक्षिंजिनीति।
यथानाडीमंडलात्क्रांतिमितांतरेणाहोरात्रवृत्तंबध्यतेतथासममंडलाद्युज्यांतरेणोपरिवृत्तंबंध
नीयमित्यादिनाग्रहगणिताध्यायांतर्गतग्रहणवासनायांपूर्वंप्रतिपादितं। अतोन्नतिनास
नाद्यर्थमपिपूर्ववत्क्रां। वासनाप्रतिपादनमुपसंहरति। ईषदीषदिति। श्रीम॰ दृक्कर्मशृंगोन्नति॥
॥ ॥अथयंत्राध्यायमारभमाणस्तदारंभप्रयोजनमाह॥ दिनगतकालानयनाइति। अत्र

दशयंत्राणिप्रतिपाद्यंतेतेषांनामान्याह। गोलइति। सर्वेषांयंत्राणांगोलमूलकत्वात्पूर्वंगोलोदेशः
कृतः। गोलरचनाप्रायुक्ता। तत्रैवगोलोतर्भगोलंबध्वावक्ष्यमाणप्रकारेणकालोज्ञेयः। यद्वा ता
म्रादिपात्रेतुमयमर्धगोलविस्तृतिपालिकमभीष्टव्यासमेकंवृत्तंकार्यं। तदर्धस्तादधिकंचयथातथा
कार्यं। यथापरिधिसमांतरावस्थितपादत्रयेभूमोन्यस्तेतदुपरितनपालिवृत्तंगोलसमंस्थितंजंतो
स्तालोकेपिस्थिरधारणार्थंयथाकुर्वंतितथाकार्यं। पालिवृत्तोदीषन्न्यूनंपात्रेतुमयंगोलंस्वतत्रया
म्योत्तरयोर्ध्रुवचिन्हेकार्यं। ध्रुवचिन्हयोरुपरियाम्योत्तरवृत्तंकार्यं। अस्मिन्याम्योत्तरवृत्तेउत्तरध्रुव
चिन्हादधोदक्षिणध्रुवचिन्हादुपरिनंवांतरेणनवतिसंख्याकान्वेधान्गोलमध्यसूत्रालक्ष्या
उभयपार्श्वविनिर्गमनायविपुलत्वंचिकुर्यात्। पूर्वकृतपालिवृत्तयाम्योत्तरयोर्नेमिमुत्कीर्यगोल
मध्यसूत्रालक्षानेमिमध्येयथासम्यक्तिष्ठतिनेमितुल्येवभवतितथाकीर्णेम्यांतांस्तालकांदधात्।
तस्मिन्गोलेमध्येपूर्वापरवृत्तंकार्यंतदेवविषुवद्वृत्तं। तस्मात्क्रांतिरेखापूर्वोक्तयुक्त्याकार्या। तस्मिन्क्रां
तिवृत्तेभगणांशाअंकयाः। नाडीवृत्तादुभयतस्त्रीण्यहोरात्रवृत्तान्यंक्यानि। स्पष्टक्रांतिवशेननक्षत्राणां
अगस्त्यादीनांचयुरानवृत्तान्यंक्यानि। अत्रनाडीवृत्तेघटिकाश्चांकनीयाः। एवंसिद्धोयंगोलोजातो

शि॰ या॰ गो॰ भगोलः। यत्र देशे यावंतो क्षांशास्तान्संख्यान्केऽउत्तरध्रुवादधस्तेरंध्रे याम्यध्रुवादुपरि तान्मितेरंध्रे च गोल
७ मध्यस्थशलाकादलापालिवृत्तेकीर्णे नेम्यादयान्तत्रदेशे तादृङ्नभोवृत्तस्य रवेर्मध्यान्नतत्वभवति। पालि
वृत्तमेव गोलक्षितिजं। पूर्ववृत्तभगोलाक्षिविदधिकव्यासंधातुनयाम्योत्तरवृत्तवत्तादृक्षिणोत्तर
पार्श्वयोरंध्रेकार्ये। भगोलोभयपार्श्वविनिर्गताशलाकातद्रंध्रद्वयंगापालीवृत्तोकीर्णनेमिद्वयगाकार्या
ततस्तस्मिन्याम्योत्तरवृत्तमध्येदृङ्नाडीवृत्तंधातुमयमक्षेणयोज्यं। पालिवृत्तादधस्तात्समेवृत्तार्द्धं धा
तुनंपालिवृत्तेसंलग्नंकार्यं। अत्रयेक्षेत्रायवनाः पूर्वैरुक्तादृक्कर्मदृत्तभवितृनिगोलेधातुमयानिवृ
त्तार्द्धवद्दयचिन्हयोरेवैकंछिद्रंविधायान्यद्धातुमयंयाम्योत्तरवृत्तेवृत्तध्रुवचिन्हरंध्रेकीलादिनिबद्धंदृङ्
नाडीवृत्तंमध्येऽत्तरध्रुवरंध्रादुपरियाम्यध्रुवादधस्तादिष्टक्षांशवद्दोनशलाकाविनिर्गमनायरंध्राणि वि
धायतस्मात्सर्वंगणितजातमानयंतिईदृङ्गोलंकुरुतिवदंति। क्षांशवादिधारणवद्यक्रियतेतत्करसं
संज्ञंव्यवहरंति। अथभगोलः। अथदिनगतइष्टनाड्यर्थमाह। अपवृत्तगरविचिन्हमितिरविचिन्हस्य
क्षायेति। नतांशज्ञानेदिनगतलग्नादिज्ञानंसुलभमितिकुमध्येरविचिन्हस्यक्षायायथापततितथाभगोलो
ध्यायेरुक्तं। अस्मदुक्तभगोलभगोलरचनायांतुनतांशाकांस्तुर्यानाड्यांक्षितिजतस्तरविचिन्हंदृङ्मं ल॰ च॰
२८

उत्तगतेष्टनतांशायेन्येतुनदापवृत्तेकुजलग्नेलग्नसंज्ञानां। अपवृत्तगरविचिन्हंक्षितिजेरखाकुजेनसं
ज्ञेनाडीवृत्तेबिंदुरंकेष्टनतांशायस्थेरविचिन्हस्यबिंदोःक्षितिजस्थनाडीवृत्तेयदंतरंतद्दिनगतमितितु
ल्यमेवारात्रावप्यभीष्टनक्षत्रस्यनतांशाभ्यैकादिनाडीयाः पूर्ववत्तनक्षत्रयुक्तवृत्तस्थदृङ्मंडल
गतेष्टभीतेकुजलग्नांतिरुत्तावयवैलग्नमितिरात्रिदिनभानवचतुष्टयसंज्ञानंसुखेनभवति। सषड्भ
योक्षितिजस्थनाडीवृत्तमंडलावयवःक्षितिजस्थोयश्चनक्षत्रयुक्तवृत्तेदृङ्मंडलगतेष्टनतांशाग्र
संपातेस्थभगोलस्थनक्षत्रचिन्हेनाडीमंडलावयवस्तयोरंतरंनाडीमंडलेरात्रिगतंस्यात्। अथभगो
लेनक्षत्रचिन्हंकथमंकनीयमितिप्रोच्यते। तत्रपिच्यक्षेपुष्यांतिमवारुणानिक्रांतिवृत्तेस्वस्वध्रुवो
न्नतांशाद्यंक्यानि। अन्यस्येष्टनक्षत्रस्यभगोलयेकुत्रावस्थितिरितिज्ञानार्थंतन्नक्षत्रस्ययाम्यो
त्तरवृत्तस्थस्यरात्रौनतांशाउन्नतांशाश्चज्ञेयाः। यदेष्टनक्षत्रंयाम्योत्तरसूत्रगतंतत्क्षितिजंतत्स्थिमेव
कालेक्रांतिवृत्तस्थनक्षत्रचिन्हेन्यस्तेयःक्रांतिमंडलावयवोयाम्योत्तरसूत्रस्यदृक्कर्मसंस्कृतोध्रुवो
वेयस्तस्मिन्नेवकालेइष्टनक्षत्रैक्यमध्यान्नतांशाग्रेचिन्हंभगोलयेकार्यं। नदेवनक्षत्रचिह्नस्यात्।
एवंसर्वेष्वपिनक्षत्राणिभगोलेंक्यानि। यद्वानक्षत्रध्रुवंक्रांतिवृत्तेदत्वातन्नक्षत्रोन्नतांशायनतुल्यान्न

चक्रदंबसूत्रेपठितशरंदत्वा तदग्रेचिन्हंकार्यं। तदेवभगोलेनक्षत्रचिन्हंस्यात्। गोलाद्रुवेधस्तु प्रागुक्तएव। इतिगोलयंत्रं॥ अथनाडीवलयमाह। अथोपगोलनलिकांतरइति। व्यस्तेरिति। केनचिदाधारेणेति। सर्वतोभद्रयंत्रंतरंमयाकृतमस्तीतिस्मापनार्थंसचांकनप्रकारः। सर्वतोभद्रयंत्रेमयोक्तइत्यर्थः। घटीयंत्रमाह। घटदलरूपाघटितेति। एतदेवकपालयंत्रमितिसोऽपिलिखितं। नरयंत्राख्यंत्रंकुर्यंत्रमाह। समतलमस्तकपरिधिरिति। चक्रयंत्रमाह। चक्रमिति। तन्मध्येसूक्ष्माक्षमिति। तदिति। विन्यस्तेपुच्छांतिमवारुणानामिति। नेमिस्पृष्टेति। प्रत्यक्षस्थितेभद्रेति। इष्टघटिकांतेप्रस्फुटकालउक्तइति। इदमेवचक्रयंत्रंउन्नतवृत्तयंत्रंराजमित्याहुः। खलभाख्यमस्येवनामेति रामेणोक्तं। तत्रैवंयंत्रनिर्माणं। मृदाधातुनादारुणावाकोष्ठकागारंश्लक्ष्णंवर्तुलंकुर्यात्। तन्नयंत्रानुमानेनाधोमुखंछिद्रपात्यर्थंस्थलंसमंततस्तस्यकाष्ठमध्येसमवेधंवृत्तंखननेनसंपादितमिवतथारचनीयं। यथापत्र्यंतदंतान्यक्षपत्राणिनपत्रैकैनयुतानिमानितुल्यान्येनभवंति। कोष्ठकागारेयावाचेधस्तावानेवभपत्रवृत्तेपिंडःकार्यइत्यर्थः। एकस्मिन्भपत्रेयावान्पिंडस्तावद्विगुणितस्तौल्यंनपत्रंकार्यमितिविशेषः। ततःकोष्ठकागारेपालौतदंतश्चदक्षिणोत्तरपूर्वापरेरेखेकार्ये। भपत्रेक्षपत्रेदक्षिणोत्तरपूर्वापर

DR BHAU DAJI

रेखेचकार्ये। सर्वेषुदक्षिणदिक्कुउच्चस्थानंसौम्यदिगंकोनीचस्थानमितिकल्पनीयं। दक्षिणदिगंकोपरिनदीकासूत्रंपश्चिमतोनातिदूरेग्रहदेशेचकिंचिच्चिकोणाकारोद्युक्किरीटयोज्यं। किरीटस्योम्यदिगंकेसुषिरंकार्यं। तत्रदृश्चिकंटकवत्तुंडंकार्यंहयामुक्तिदंतग्रेचवृत्तमुद्रिकातस्यांवाधारसूत्रंक्षेत्रंकिरीटसुषिरेकार्यं। कोष्ठकागारकेंद्रेमेरुकीलंनिवेश्यनाडिवृत्तंकार्यं। कोष्ठकागारपार्श्ववर्तिरेखातत्र्यासतुल्ययोसानामक्षपत्राणांतद्व्यासतुल्यव्यासंभपत्रस्यचकेंद्रेमेरुकीलंनिवेश्यनाडिवृत्तानिकार्याणि। तथाहि। मृदाधातुनादारुणावाभमोक्षानिवृत्तानिमुद्यन्। किरीटंचकिंचित्। विहायस्थलंपालयेत्तत्पूर्वसुखालं। समक्षिणकोष्ठगतायत्ररेखापरप्राक्समंकपालेयदृश्यं॥२॥ सजेकोष्ठकागारमित्यस्यतिर्यग्विशेषायान्यरेखातगाप्राक्पतीच्योः। इदंदृष्टभागेपिरेखाद्वयंस्योत्तरोन्नतभागेषुसाम्यंचतुर्थं॥३॥ निक्षिप्येकाकिरीटस्थितसुषिरगतेदृश्चिकारोभकीलेमुद्रासाधारसूत्रादृढमिहसुषिरेन्यस्यकीलंतदग्रात्। वध्नीयात्सूत्रंसस्थंस्यादिति। नयदितस्ववरेखाचक्रेस्थिरंयंत्रंस्योत्स्यंविधायस्खलसमतासूत्रयोगेनकार्यी॥४॥ तस्यातमानसमतलंतरेरंभरेखायुग्माक्षपत्रनिचयोत्तरतोस्यधार्यः। सकैंतुतोद्विगुणस्योन्यपुनःकोणपालिस्पृङ्नूत्तमतयानिहितंयथादः॥५॥ योकोष्ठाभयपत्रकाण्यपिविशेद्विलोनरांकीलकस्तीक्ष्णयतयोन्नतुलितोग्रगन्यरेखांसमे। प्रत्यानस्पृशतिभुजाचनयनेसामुख्यतुल्यो तरच्छिद्रेरेखादृश्यतीस्वमध्यसुषि

रात्सार्द्धहृये पिस्थिते।८।समस्तंविषयस्थितेमेरुकीलेग्रतःसन्नवेद्ग्यवृत्तेसूक्ष्मरंध्रे।दृष्ट्वायद्योद्ग्रा
ह्यकीलोन्नयंत्रेयथाविस्तृतिस्यृष्टभावाधिकत्वं।७।षष्ठ्यंशकैर्यासमितिंकलाद्येर्विभज्यपात्यंत
रेखिकायां।व्यासांतरंस्ववृत्तेलवैर्विदध्यान्मध्यास्तुयोगंमकराख्यवृत्तं।८।नागाग्निलिप्ताद्भुनवेंदुभा
गैस्तुलाजवृत्तंवलयंचकार्यं।अर्कांशकैर्भूरविलिप्तिकाद्यैःकेंद्राद्भूमस्कर्कटकेनकुर्यात्।९।पालो
कोष्टहेत्रिवृत्तजनितेवीथीहृयेनासितांतंशंकानूपथमंस्वषट्त्रिखिलवानंतश्चकेंद्रोमुखान्।
रेखानिर्विलिखेत्तथैवमकरंकर्कटेपिलेख्यंक्रचिक्रेचित्रोचुरपक्रमोद्रोगुणकाभास्थितिंतत्रच।१०।द्यु
ज्यावंद्वानयनं।दोज्यायुक्तमजामतस्सजनितिंक्रमज्योद्धृताद्युज्यावंउकएषस्वयंहृतांतर
घ्नकलिकास्वांशायुक्तवंउकः।११।अक्षपत्रेषुलेखनार्थंक्षितिजायुक्तबलयोस्वदायतेकेंद्रव्या
सार्धनाथंपलेष्यस्तत्र्यूनाजवतुल्यांशितश्चद्युगुणयोयुतोनोंयःप्राचीभवति।दलितानुजबलयेक्र
माद्यावंःकेंद्रंपलतुल्यंहरेषातद्विनवदिक्त्रिवेणुकायुक्तंतलयमितिक्षोण्यमतिमानू।१२।स्वजेकें
द्रव्यासोपुनरपितथैवोन्नतलयोपिकल्पेतानूहेषायेलमचितेभ्यःपरिहरनू।क्रमात्केंद्रव्यासोयुतरहि
तइषुगुणयोःपलाहृःसिंजिन्याःस्युरथवेतोकिलदले।१३।लक्षादिनोदृष्टनिजेष्टसमाक्षपत्रेकें

द्रात्पुदक्षिणदिशःकुजकेंद्रमित्या।रेखांसमंक्यसमभंगितांतरोस्यास्तद्व्यासमानपृष्ठकर्कटकेनदत्तां
श्च।यत्रेखिकाजवलयोद्वयोर्योगयुग्मंकुर्यात्स्पष्टज्ञातेदृग्मध्यतएवयाम्यो।तन्नमितोरचितचिन्नतएवकें
द्रव्यासप्रमाणपृष्ठकर्कटकेनकुर्यात्।१४।वृत्तान्यथोन्नतभवानिदृग्मंडलेकेंद्रव्यासांतरंशशिनतमंत
रमत्रसौम्ये।भुजादृग्मस्त्रिवलयोंशवलिर्विभज्यकर्कादिकारेखयेत्वलयान्यथांकैः।चिन्नत्रयोपरिस्थ
नेरीविसंख्यहोराःप्रत्यक्षएवविलिखेत्खवृत्तेसौम्ययंत्रे।१५।क्रांतिवृत्तस्थापनंकेंद्रव्यासेष्टगुणकु
लाद्व्यासभागेप्रदद्याल्केंद्रंतुद्युकलकर्कटकंव्यासभागेविदध्यात्।प्राग्वेखाकुजोद्भवमितियुगंमार्गका
र्केचचंद्रहृतंक्रांतेःसमभथस्वजेदंतरांशाःस्फुटंतं।१७।मार्गार्धजांजवलयोपर्यपमावधिस्वजेद्धृते
अवमनलयांतरमत्राप्यार्थमेतदिष्टमिति।उदगपमविहीनायाम्ययुक्सौम्ययंत्रेननतिपरमथा
स्याद्याम्ययंत्रेततोंकात्।द्युगुणहृतनिजाहोरात्रमानद्विघातंतत्खदहेनलवमध्येयंत्रपृष्ठंतत्रकक्षा
।१८।परिधिगवलयेदृक्कर्मवेंद्वोर्दृग्मंडलेनुकेंद्रसूक्ष्मेपंक्तिसार्या।स्वदिनगुणमितेनोंशसं
जेकर्कटेनस्फुटसुखमिहकेंद्रासूत्रगंनामयुक्त्या।१९।अथवाकीदृक्कर्मनयनप्रयासेनयंत्रेकेंद्रो
ऋवेस्थानंतस्मादुपरियाम्यसूत्रेवनुस्थिरोलंबकाधिकाष्टांशोः क्रांतिवृत्तकेंद्रंकदंबसंस्थंभवति।यं

पोक्तसायननक्षत्रध्रुवकमकनायनदृक्कर्मकक्रांतिवलनेदेयं। ततः कदंबनक्षत्रध्रुवकविक्षेपलं
पालिप्तसंयावत्सूत्रंनयेत्। अस्मिन्सूत्रेतन्नक्षत्रशरवशगुणगुणाजिनज्यायुक्तत्रिज्याभाजितांकदं
नसूत्रनक्षत्रध्रुवकसंपातादुपर्यधोयाम्योत्तरशरेसतिक्रमेणदेया नक्षत्रचंचुः कार्या। पूर्वरेखा
योर्यत्रबलसायनध्रुवकपातिप्तेतत्रचंचोच्चलापितार्यी। दिक्साधनसंलग्नमध्यगास्यमध्येदृक्कर्मायनं
भवतीत्यंत्रप्रकारोराशेरौदयंत्रंप्रकरणमुक्तं। अमुनाप्रकारेणलंकोदिसाधनेमहेंद्रसूरिप्रभृति-
करेपसव्येविलिखेदयंत्रं। ज्योतिर्विदाभास्करसंमुखेन। तथाचुजायंपरिचालनीयंयथा विशेष्ट
द्युगेर्कतेजः। पूर्वेहनिप्राक्कपालकुभोत्थुजायस्पष्टशरेवेरुन्नतभागकाः स्युः। तएवमध्यंदि
नतोपरिशशरात्रौग्रहोदृष्टिपिचेवमेव। दयंत्रांकंप्रागपरेचभूजेचलोन्नतांशोपरिगेचतेस्मिन्नु द्दि
ष्टलग्नसंलग्नमृगास्यमध्येकालांशकैःपलप्रमाणैःषष्टिविभक्तैर्दिवसस्ययातंशोपंचद
शादिपरिस्फुटंस्यात्। तथोन्नतांशास्पष्टश्रीभास्करोक्तोप्राग्भुजगैःसायनलग्नभागैः। एवंरविः स
प्तमराशिगोयत्रैवहोरानस्तंसलग्नेसिद्धैव। होरायुनाथाच्चेतत्पष्टषष्ट्यगण्यापरभूजज्यो
न्नतांशकंप्राक्स्थितिजनिवेश्यचिन्हंमृगास्येविरचय्यपश्चात्। अभीष्टकालेघटिकोपरिस्थं

तदेवच्चापरिचिंतनीयंदयंत्रांकोयत्रहितुंगयत्नेतदंकसंख्यास्पनोन्नतांशाः। मध्याह्नोत्पक्षितिनि
जानथैनतेवोपनीयाःस्वपिपाचक्षिणेष्टाः। विद्धोन्नतांशोपगतेचभास्येदयंत्रांकेतेदृक्जलस्थितेच।
चिरंदृयांतर्गतइष्टनाडीपलादिपूर्णापररात्रिभागे। तत्रैवनक्षत्रमुखेनिविष्टंप्राग्भूजगंसायनलग्न
मेति। सूर्योन्नतांशाधिष्ठितवृत्तसंस्थंतदापिहोरांचनिधिस्फुटंस्यात्। अंशैकेष्टहोरायुतिलग्न
भागेदयमध्यगोपनपर्वभानौ। द्वितुर्यहोरास्थितसप्तमांशेरविमध्यगावेत्रिभार्कसंख्यो। रात्रा
वभीष्टग्रहलग्नयोश्चमध्योन्नतांशान्निजभागसंस्थाभास्यग्रहाद्योनतभागकांशाः स्फुटोभवे
न्नस्यनदारवगस्यास्तंभादिकानामनुविध्यनाग्रंयंत्रेणनक्षत्रनदृच्चनाथाः। सोयेस्वपादाग्र
धुनंजुनायमयंकृत्वाचतदुन्नतांशान्। साद्याथकोष्टद्वितयांशकुण्यांयोष्टद्युचाच्यतस्य
चेकांक्षिपन्निकर्षन्नचपियात्रभयोनुजोग्रभागेनतदंशवेद्यः। समंकयेदुन्मथोस्याचिन्नं
द्वयांतरंस्वतसमाहतंच। सूर्याहतंवानिजभानयुक्तंकृत्वावदेत्यदीप्तितुंगतांशैः। यंत्रैराजै
प्रत्यंशसंयुक्तदृदेशयुक्तैर्कुमोक्षसिद्धएवस्फुटाः स्युर्नतिस्तदाप्रायेणकोष्टद्वितयाद्यूनाया
याहतंनरंदृसूत्रगमंकं। उन्नतांशोभ्यस्ताद्यंस्वपादंतुगतानासेया। नक्षत्राणामगस्त्यादी

नोऽभ्रवकाबाणाश्च नक्षत्रभ्रुवकापिकारोक्तापक्रमाद्याः। एतदेव नक्षत्रजानयंत्रेनिवेश्यं त्रैवर्णिकैरेता
न्येवनक्षत्राणिपरिचीयंतेनहियवनपरिचितैः किंचिदेयोजनमस्माकं। अपरिचितानांवेपायोगेनान
र्थक्यापत्तेः। दक्कर्मापिप्रागुक्तमेवयाह्यायवनसंज्ञंतंत्रेपरीक्षणीयं। महेंद्रसूरिणाप्रकारद्वयेनयवनम
तमाश्रित्यदक्कर्मोक्तं। तत्रप्रथमप्रकारःसुतरामयुक्तएव। रोहिण्युदहरणादयनक्षत्रदक्कर्मानयने
महदंतरित्वायुक्तिशून्यत्वाच्च। अत्रोपपत्तिरुच्यते। गोलाद्यथाकालादिज्ञानंसंपद्यतेतदविसंवादि
नयंत्रांतरासंपादनायक्षितियंत्रराजासंपादितं। गोलस्यमेरुचिन्हकीलोराजंरसांगोऽर्धवृत्तवतिमे
षादिपुरात्रैराशिभागैर्मकरादिपुरात्रंपरमाक्रमयुक्तनवतिभागैरेवभवति। तत्रायंत्रेत्रिंशान्नि
तमेवमेकरज्वंकल्पितं। मेषप्रमाणमनुपातेन। परार्कक्रांतिज्यायुक्तत्रिज्ययात्रिंशाल्लभ्यंते तदाप
रार्कक्रांतिज्योत्थयुज्ययाकिंमितिमेषप्रमाणंभवति। एवंकर्कादिपुरात्रेष्वपि। ननुमेषादिपुज्यायात्रि
ज्यातुल्यत्वेनेष्टस्थानेत्रिज्यायहीतुंप्रयुज्यतेनपरमार्कक्रांतिज्योत्थयुज्येतिचेत्सत्यं। गोलत्वमेवायंत्रस्यदृत्त
क्षेत्रत्वेनपरमक्रांत्युत्थयुज्येवयाह्या। यंत्रस्थमेरुस्थोनोन्मण्डलगुणपरिणतयापरार्कक्रांतिज्या तु
ल्येयाम्यसूत्रेक्रांतिवृत्तकेंद्रमितिगुणपरिमाणनपरार्कक्रांतिज्यानुजः। यंत्रकेंद्रान्क्रांतिवृत्तस्थ

ल॰ट॰

मेषादिचिह्नंप्रतिनीयमानंपूर्वापरसूत्रराकलंबगुणपरिणतषष्टिभागज्याकोटिः। स्वगुणपरि
णतत्रिज्याक्रांतिवृत्तकेंद्रादृत्तस्थमेषादिचिह्नंयावत्सूत्रंकर्णः। इदंक्षेत्रंयंत्रोपरिग्रहयक्षतोदृश्यतेतत्परि
कर्मेषादिर्यन्मार्गेणयातितद्यंत्रस्थमेषादिपुरात्रमितिनकोपिदोषः। एवंकर्कादिपुरात्रवृत्तेष्वपि
वेद्यं। तस्मात्परार्कक्रांतिज्योत्थयुज्यास्वगुणगुणापरार्कक्रांतिज्यास्फुटक्रांतिज्यागुणिताक्षज्या
प्तंत्रिज्याभक्तामेषप्रमा
णंभवतीतिसिद्धं। महेंद्रसूरिणातुकोटिभवोत्क्रमज्यात्रिज्यादुणापक्रमक्रमकोटिभोवर्तुलतोविरु
द्धेवाप्रमाणमानीतं। तत्रोपपत्तिः। परमापक्रमोत्थयुज्येनात्रकोटिरुद्देश्योच्यते। पूर्वंसिद्धोयो
गुणहरोपरक्रांतिकोद्युक्रमज्यायाःगुणितोजातंगुणस्थानेपरक्रांतिकोद्युक्रमज्यायाप्तः। हरस्थ
नेकोटिक्रमज्यावर्गः। अत्रभुजज्याशब्देनपरार्ककांतिज्यागृह्यते। भुजज्योत्क्रमज्यायोर्योभुजज्या
ज्यात्रिज्यांतरेणकोद्युक्रमज्यातुल्येनगुणितःकोटिज्यावर्गएवभवति। कोटिज्यावर्गोनामदो
र्ज्यात्रिज्ययोर्वर्गांतरेतद्भुजज्यात्रिज्ययोर्योगांतरघाततुल्यमितिसिद्धं। पुनरेतोगुणहरोकोटि
क्रमज्यापरपर्यायद्युज्ययोपवर्तितौगुणस्थानेकोटिभवोत्क्रमज्यातौजौ। हरस्थानेपरक्रमकोटिज्ये
नजातौ। वर्गस्यसमद्विघातरूपत्वात्। कोटिभवोत्क्रमज्यात्रिज्यादुणापक्रमकोटिभोवर्तुलतोविरुद्धेतिसाम्या

कं। कर्कवृत्तस्योपपत्तेः। यंत्रकेंद्रात्कर्कांत्यपरमार्कांत्यकोटिज्यातुल्यांतरेणैवसंपतंतोध्व
प्रतीतिनावदेवकर्कवृत्तप्रमाणंभवति। क्रांतिवृत्तकेंद्रस्य क्रांतिवृत्तस्थकर्कादिस्थानस्यांतरंत्रिज्या
कोटिज्यामज्येतिप्रसिद्धा जातं। कोटिभक्रमज्यातुल्यं कर्कप्रमाणंस्वगुणपरिणामायानुपातः य
दिपरार्कक्रांतिज्यायुक्तत्रिज्यायास्त्रिंशद्गुणंतदाकोटिभक्रमज्यायाः कियदितिकर्कमानंभवति।
१२।२१ अत्रापिमहेंद्रसूरिणागोरवंकृतंगुणहरोगुणनेवगुणितोजातोगुणस्थानेकोटिक्रमज्या
वर्गोनवज्रातगुणः। हरस्थानेपूर्वोक्तन्यायेनजातः कोटिक्रमज्यावर्गस्त्रिंशद्गुणः। अयंतुपूर्वोक्तनेषप्र
माणवर्गस्त्रिंशद्गुणतुल्यएवयुक्त्या सिद्ध्यति तुलाजमानस्यक्रांतिः स्वराशेर्हीनाधिकभवति। दिक्कुलीरसा
नप्रिस्थक्रां। क्रांतिवृत्तव्यासार्धंत्रिज्यासैवक्रांतिवृत्तव्यासस्थानेस्वगुणपरिणामायानुपातेन
यदिपरार्कक्रांतिज्यायुक्तत्रिज्यात्रिंशल्लभ्यतेतदात्रिज्ययाकिमितिक्रांतिवृत्तव्यासप्रमाणंयंत्रेभवति।
महेंद्रसूरिणात्रप्रकारांतरंकृतं। परक्रांतिज्योनात्रिज्याकोटिक्रमज्याखंडद्वयात्मिका। प॰को॰ज्या॰
त्रिज्या॰ २ यंत्रनरोक्रमज्यानरोर्विक्रयागुणितोजातस्वउंद्वयं। प॰क्रां॰ घु॰घा॰ २ परक्रांतिज्यास्त्रज्या ल॰ट॰
त्रिज्याघातः २ इदंक्रांतिज्यायुक्तत्रिज्यायोगतुल्यं। इदंअर्धितंजातंत्रज्यायुक्तत्रिघाततुल्यमुपरि ४२

रस्तुयथास्थितएव। इदंत्रिंशद्गुणंत्रज्याभक्तंजातंत्रिंशद्गुणत्रिज्यापरक्रांतिज्यायुक्तत्रिज्यायुक्तत्रिज्याघात्ये
तियंत्रकेंद्रात्क्रांतिवृत्तकेंद्रेपरक्रांतिज्यायेभवतितस्यस्वगुणपरिणामार्थमनुपातः। यदिपरार्कक्रां
तिज्यायुक्तत्रिज्ययास्वगुणालभ्यंतेतदापरार्कक्रांतिज्ययाकिमिति। क्रांतिवृत्तकेंद्रंसिध्यति। क्रांति
वृत्तव्यासानयनेयदर्शितंतदिदं। पूर्वदलमिदमुच्यते। पूर्वदलंकोटिज्यात्रिज्याघातः। परार्कक्रांतिज्या
युक्तत्रिज्याभक्तइतिसिद्धं। इदंसमस्तदलेनकोटिगुणापरपर्यायेणज्यातः शोध्यं। तत्रैरनंउत्तरयोश्चनर्णयोस्तु
ल्ययोर्नीत्याजातयंत्रकेंद्रेनरखंडेयुज्याक्रांतिज्याघातः परार्कक्रांतिज्यायुक्तस्त्रिज्ययाभाज्यइतिप्रसिद्धं। इदं
स्वगुणगुणंयुज्याभक्तंकृतं। एवंजातेस्वगुणपरिणामार्कपरक्रांतिज्येनकेंद्रमितिजातमेव। परापमा
नदमौर्विकायांहतानस्योक्तमज्जीवयासा। ततोविभक्तापरमापमाख्यमौर्वीतिमज्यायुक्तयायदाप्तं।
कोटिज्यायामिश्रितमर्हितंतंतत्रिंशद्गुणंकोटिगुणोनमक्तंलभ्यंचतद्व्यासदलंतत्पूर्वदलंकोटिगुणो
जितेतु। शेषंखरामेर्गुणितंविभक्तंकोटिज्ययाप्तापमतोलवादिकेंद्रभक्तंस्वभवेस्वस्वर्णंतदंत
तोव्यासदलभ्यमः स्यादितिगोरवेणप्रकारांतरमुपकल्पितं। महेंद्रसूरिणातदयुक्तं। आयायत्र
विचित्रभंगिभिरार्षेतत्प्रसिद्धौक्रियालघ्वीवाथसमानदेवसुरिणाकार्यप्रकारांतरमित्याद्यायोक्तः

नसमंनास्थितानांयुज्यानयनेस्वग्रहलंबाधिक्येतुकोटेःक्रमज्यात्रिज्याभुक्तेवोत्क्रमज्याभवति। बाणं
हृतानतक्रमज्यात्रिज्यात्रिज्यान्वितासेवनतात्क्रमज्येतिन्यायेन। मेषप्रमाणगुणनंक्रमदोर्ज्यीभा
गहरणंतुल्यमेव। अथक्षितिजवृत्तस्यकेंद्रव्यासस्साधनोपपत्तिः। मेरौतुनाडीमंडलंक्षितिजं।
निषधहेमंचुसदोस्सूत्रैः। मिस्सूत्रमध्यकेंद्रमेवभवतीतियंत्रकेंद्रक्षितिजकेंद्रयोरंतराभा
वः। यंत्रेमेषप्रमाणवृत्तस्यनाडीमंडलेनमेरौक्षितिजव्यासोमेषप्रमाणतुल्यः। तस्मान्मेरौक्षितिज
केंद्रव्यासयोरंतरंपरमंमेषप्रमाणतुल्यं। लंकायांनिरक्षक्षितिजस्ययंत्रकेंद्रोपरिगापूर्वापरसूत्र
रूपत्वेनकेंद्रव्यासस्योत्तुल्यत्वोन्नीकरावस्यत्वात्केंद्रव्यासांतरामावः। तस्मादक्षज्यावशेनक्षितिज
केंद्रव्यासांतररेखाप्यंत्रयक्षज्यातुल्यंनभुजेनलंबज्यात्रिज्येकोटिकर्णौतदामेषप्रमाणतुल्येनभु
जेनक्षितिक्षितिजकेंद्रव्यासोपपत्तेः। मेषप्रमाणवृत्तपूर्वापरसूत्रसंपातएवमेषादेरुभयस्यानस
द्वावानक्षितिजसंपातोप्यनावश्यकः। नहिक्षितिजवृत्तेमेषादिक्रमपूर्वापरसूत्रसंपातस्यांतरेति
र्यक्कर्णरतिक्षेत्रं। एवंमदामातिक्षितिजसंपातंयानदक्षांशोदयं। तदप्यक्षितिजव्यासेनयंत्रे

यद्वत्तशकलं तत्क्षितिजं॥ यत्रकेंद्रात्सौम्यरूपक्षितिजसंपातंयावद्क्षांशोत्थद्युज्यैव॥ लंबज्योनत्रिज्यायां
अक्षांशोत्क्रमज्यारूपायामेषप्रमाणगुणनप्राप्तावक्षक्रमज्याभक्तत्वात्॥ मेषप्रमाणगुणालंबज्यक्षं
त्रि ज्याभक्तात्क्षितिजकेंद्रंमेषप्रमाणगुणाज्याक्षज्याभक्ताक्षितिजव्यासोभवतिकेंद्रव्यासांतरंकार्यं॥ तत्रलं
बज्यात्रिज्ययोरंतरंमेषप्रमाणगुणमक्षज्याभक्तंजातमक्षज्यातुल्यं॥ केंद्रव्यासयोगस्तुमेषप्रमाणगु
णोक्षक्रमज्याभक्तोलंबज्यात्रिज्ययोगएवभवति॥ अयमेवपलांशीरात्रिषट्कद्युज्यातुल्योभवति॥ यो
गोंतरेणोनयुतोर्धितइति॥ मर्हेंद्रसूरिणापलैर्विहीनागगनाष्टरूपाद्त्याद्युक्तं॥ अत्रयद्देशीयमक्षपत्रं
कर्तुमिष्टंतद्देशीयाक्षांशवशेनमकरादिस्थार्कदिनपलमेकाद्युन्नतांशाजनितनतघट्यात्मककालंच
सिद्धांतोक्त्यासाधयेत्॥ उन्नतवलयस्थमकरवृत्तयाम्यसूत्रसंपातेप्रथममकरार्कंनिवेश्य कोल
वृत्तयाम्यसूत्रसंपातेचिह्नंकार्यं॥ ततोदिनार्धतुल्यनतघटिकासकालवृत्तयाम्यसूत्रसंपातात्पूर्व
तः पश्चिमतश्चचिह्नंकार्यं॥ एवमेकाद्युन्नतांशाजनितनतघट्यात्मककालंचसिद्धांतोक्त्यासाध
येत्॥ उन्नतवलयस्थमकरवृत्तयाम्यसूत्रसंपातेप्रथममकरार्कंनिवेश्य कालवृत्तयाम्यसूत्रसं

पातेचिह्नंकार्यं॥ ततोदिनार्धतुल्यनतघटिकासकालवृत्तयाम्यसूत्रसंपातात्पूर्वतः पश्चिमतश्चचि
ह्नंकार्यं॥ एवमेकाद्युन्नतांशाजनितनतघटीनांचिह्नातिकालवृत्तस्थमकरवृत्तयाम्यसूत्रसंपातात्पू
र्वतः पश्चिमतश्चकालवृत्तेचिह्नंकार्यं॥ कालवृत्तस्थचिह्नेपरिमकरार्कंकृतेउन्नतवलयेयानिमकरा
र्कचिह्नानितानितत्रक्षितिजाद्युन्नतवलयचिह्नानिभवंति॥ एवंमेषाधिष्ठितार्कस्यदिनार्धंचद
शघटिकात्मकंतत्सिध्यमेवास्ति॥ एकाद्युन्नतांशवशेनमेषादिस्थितार्कस्यनतघटिकाः साध्याः॥
याम्यसूत्रेमेषादौलापितेयत्रमकरार्कस्यकालवृत्तेलग्नंतत्स्थानादिनार्धतुल्यनतघटिकामकरा
र्केतिवेष्टितेयत्रकांतिवृत्तमेषादिः पूर्वतःपश्चिमतश्चमेषवृत्तेलग्नंतत्रमेषवृत्तेक्षितिजचिह्नं॥
इष्टोन्नतांशाजनितेनतघटिकांकेमकरार्केनिवेष्टितेयत्रमेषादिर्लग्नंतत्रतत्रोन्नतवलयचिह्नानि
भवंति॥ एवंकर्कादिस्थितार्कस्यदिनदलमेकाद्युन्नतांशवशेननतघटिकाश्चसाध्याः॥ याम्यसू
त्रेकर्कादौलापितेयत्रमकारार्कंकालवृत्तेलग्नंतत्स्थानात्पूर्वतः पश्चिमतश्चकर्कादिस्थितार्क
दिनदलघटिकाएकाद्युन्नतांशाजनितनतघटिकाश्चकालवृत्तेदत्वामकरार्केनिवेष्टितेक्रांतिवृत्त

कर्कोदयंत्रकर्कवृत्तेलग्नतिर्यक्षितिजाद्युन्नतवलयचिह्नानिभवंति एवंक्षितिजस्यकर्कवृत्तेचिह्नद्वयं।मेषवृतेचिह्नद्वयं॥मकरवृतेचिह्नद्वयमिति॥षट्चिह्नानि भवंति॥उन्नतवलयानामपिषट्चिह्नानिभवंति॥स्वीयस्वीयवृत्तचिह्नषट्कलग्नानियानिवृत्तानितानिक्षितिजाद्युन्नतवलयानिसंपद्यंते॥क्रियमाणयंत्रकेंद्राणितावद्भिरंतरैःभवंति॥तन्मितानिकेंद्राणितेषांक्षितिजाद्युन्नतवलयानांभवंति॥तेषांवृत्तानांयानिव्यासार्धानितेव्यासार्द्धस्फुट्यंतेतत्राक्षांशेभ्योन्यूनोन्नतांशानांकेंद्रेभ्योव्यासाअधिकाएवभवंति॥अक्षांशेभ्योन्नतांशानांव्यासेभ्योधिकानिकेंद्राणिभवंति॥उन्नतवलयानांकेंद्रव्यासांतरंअक्षांशोन्नतांशांतरद्युज्यातुल्यंप्रत्यक्षंदृश्यते॥लंबांशानतांशयोगःद्युज्यातुल्यःकेंद्रव्यासयोगोभवति॥योगोंतरेणोनयुतोर्धितद्धृतिकेंद्रव्याससाधनमक्षेचशेषेचषडुन्नतांशातिथियडुक्तंतत्सर्वंशोभनं॥यद्वामेषमकरकर्कवृत्तानिपूर्ववद्दूरंचव्यादिगंकितानिकृत्वामेषवृत्तंचक्रांशांकैरंकयेत्॥ततोमेषवृत्तपूर्वसंपातान्मेषवृत्तपरिधावुपरिभागेक्षांशतुल्यंतरेचिह्नंकार्यं॥यंत्रेदक्षिणरेखामकरवृत्तादूर्ध्वमपिफलकादीर्घिकार्या॥ ४५

ततोमेषवृत्तपूर्वसूत्रसंपातादक्षांशकृतचिह्नलग्नंसूत्रंदीर्घंयाम्यरेखांनयेत्॥तद्यत्रयाम्यरेखायांतत्रक्षितिजस्यव्यासांतरगतिचिह्नंज्ञेयं॥एवंपश्चिमेसूत्रमेषवृत्तसंपातादधःप्रदेशेमेषवृतेपलांशतुल्यंतरेचिह्नंकार्यं॥मेषवृत्तपूर्वसूत्रसंपातादेतत्॥चिह्नंप्रतिसूत्रंनयेत्॥तद्यत्रयाम्योत्तरसूत्रेलगतितत्रक्षितिजस्यद्वितीयव्यासांतगचिह्नंस्यात्॥ततोव्यासांतगचिह्नद्वयांतरार्धकेंद्राद्व्यासांतगचिह्नद्वयांतरार्धमितकर्कटेनयद्वृत्तंतत्क्षितिजंभवति॥एवंमेषवृत्तपूर्वसंपातात्षडंशाचिह्नलग्नंसूत्रंयाम्यरेखायांलग्नंदूरंनयेत्॥तद्यत्सूत्रसंपातेषडुन्नतांशवलयव्यासांतचिह्नंभवति॥एवंमेषवृत्तपश्चिमसूत्रसंपातादधःकृताक्षांशचिह्नादुपरिप्रदेशेषडंशैश्चिह्नंकार्यं॥मेषपूर्वसूत्रसंपातादेतत्कृतचिह्नोपरिसूत्ररूपारेखाकार्या॥सायत्रयाम्योत्तररेखायांभवति॥द्वितीयंव्यासांतगचिह्नं॥ततोव्यासांतगचिह्नद्वयांतरार्धकेंद्रात्क्षितिजवत्उन्नतवलयोत्पादनंएवंसर्वेष्वप्युन्नतवलयानिमेरुयंत्रकेंद्रंप्रकल्प्ययंत्रंक्रियतेतत्सौम्ययंत्रमित्युच्यते॥अत्रयत्क्षितिजंतन्मकरद्युरात्रवृत्तक्षितिजसंपातद्वयाधःक्षितिजवृत्तशक

लमेवभवति॥ वडवद्यंत्रकेंद्रंप्रकल्प्ययंत्रंक्रियतेतद्याम्ययंत्रमित्युच्यते॥अत्रयाक्षितिजांतर्लक्रां
दिद्युरात्रवृत्तक्षितिजसंपातद्वयाधःक्षितिजवृत्तखंडंभवति॥याम्ययंत्रेक्रांतिवृत्तस्यकेंद्रंयाम्यकें
द्रंएवस्वीक्रियते॥मिश्रत्वान्मिश्रयंत्रमित्युच्यते॥यंत्रयंत्रेणापिकालादिसाधनेफलंतुलंय
थासमायातितथायं॥नाप्यसौम्ययाम्यमिश्रभेदेनबुधैर्विरचितानि॥सूर्योयस्मिन्नाश्याद्यव
यवेसप्रदेशोयत्रयंत्रेपूर्वरेखायांयत्रलगतितच्चिह्नस्यमेषवृत्तस्यपूर्वरेखायांयदंतरंतदुन्म
ंडलेक्रांतिज्याभवतिसामेषवृत्तादुदिश्वेतदादक्षिणान्यथासौम्याभवति॥एवंसएवसूर्यराश्या
द्यवयवःक्षितिजेयत्रलगतितस्यमेषवृत्तपूर्वक्षितिजसंपातस्यक्षितिजेयदंतरंसाग्राभव
ति॥तज्याकार्या॥सूर्याधिष्ठितराश्याद्यवयवोमेकचिह्नसंपातोद्येनमार्गेणवृत्तरूपे
णभ्रमतितत्तद्द्युरात्रवृत्तंमध्यादिनासंपादनीयं॥अस्मिन्नृतेउन्मंडलक्ष्मावलयांतरं
यावत्तद्भुजज्याकुज्याभवति॥कुज्याभुजःक्रांतिज्याकोटिःअग्राकर्णः॥एवंपश्चिमक्षि
तिजेपि॥ एवमग्रायोर्निबद्धसूत्रमुदयास्तसूत्रंस्यात्॥उत्तरगोलेसूर्याधिष्ठितराश्य

४६

वयवोयत्रनिरक्षभुजेलगतितस्माद्भारादंसूत्रंलंबरूपंयावत्क्षितिजपर्यंतंतावानुद्दृत्तस्यांकुः॥
अनेनोन्मंडलसंकुनाखंडद्वयमग्रायाःसंपादितमादिखंडमग्रखंडंचेति॥उद्दृत्तनाकोटिःअ
ग्राग्रखंडंभुजःकुज्याकर्णः॥उन्मंडलसंकुर्भुजःअग्रादिखंडंकोटिःक्रांतिज्याकर्णः॥सूर्यो
धिष्ठितद्युरात्रवृत्तविभागेतस्मालंबसूत्रंक्षितिजेयत्रपतति तच्चिह्नस्यतथाग्रस्ययदंतरंतच्छं
